National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 369-371
© 2026 NJHSR
www.sanskritarticle.com

**मोनालिसा प्रधानः**
शोधच्छात्री, साहित्यविभागः,
राष्ट्रियसंस्कृविश्वविद्यालयः,
तिरपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**मोनालिसा प्रधानः**
शोधच्छात्री, साहित्यविभागः,
राष्ट्रियसंस्कृविश्वविद्यालयः,
तिरपतिः, आन्ध्रप्रदेशः

# संस्कृतस्तोत्रकाव्यानाम् उद्भवविकाशश्च

**मोनालिसा प्रधानः**

**नीलाचल निवासाय नित्याय परमात्मने।**
**बलभद्र सुभद्राभ्यां जगन्नाथाय ते नमः॥**

संस्कृतभाषा समग्रे प्रपंचे सर्वोत्कृष्टा इति सर्व विदिता। तत्रापि वैदिकलौकिकभेदेन भेदद्वयं वरीवर्तते। वैदिकवाङ्मये तु वेदाः, ब्राह्मणानि, उपनिषदाः एवं अन्तर्भवन्ति ये- 'अनादिनिधना नित्या' इति कथ्यते। सर्वज्ञानमूला तथा आचार विचाराणां मूलभूताश्च स्वीक्रियन्ते। महर्षि वाल्मीकि लौकिक संस्कृत -साहित्यस्य आदिकवि तथा तस्य कृतिः 'रामायणम्' लौकिक संस्कृतसाहित्यस्य आदिकाव्यमिति स्वीक्रियन्ते -

**मा निषाद प्रतिष्ठा त्वमगमः शाश्वतीः समाः।**
**यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥ (रामायणम्)**

अस्मिन् पद्ये अनुष्टुप् छन्दः प्रप्रथमतया प्रयुक्तः । महर्षि वाल्मिकिना रचित संस्कृत लौकिक साहित्यस्य आद्यश्लोकः। तस्मिन् युगे महर्षि बाल्मिकिना महाकाव्यस्य लक्षणमपि उच्यते यथा-

**अलङ्कृतं शुभैः शब्दैः समयैर्दिव्यमानुषैः।**
**छन्दोवृतैश्च विविधैरन्वितं विदुषां प्रियम्॥**

एवमेव रूपेण कविभिः काव्यानि रचितानिः। पुनश्च काव्यान्यपि स्वरुपभेदात् महाकाव्यम्, खण्डकाव्यम् इत्यादिरुपेण विभक्तानि।

भारतीयाः विश्वसन्ते यत्- धर्मार्थकाममोक्षाः पुरुषार्थाः चतुष्टयाः मनुष्येण यथाक्रमेण सर्वे साध्याः सेव्याः च। पुनश्च कथ्यन्ते यत् पुरुषार्थेषु धर्मार्थकामा: लौकिकाः, एवंञ्च मोक्ष: आध्यात्मिकः।पूर्वत्रयस्य त्रिवर्गः इत्यपि नाम वर्तते। सामान्यतया त्रिवर्गस्य मोक्षस्य च समन्वयेन साधनम् असम्भवमेव। यत: मोक्षाभिलाषी, मुमुक्षुः लौकिकविषयासक्तः न भवेत् वैराग्यसम्पन्नश्च भवेत्। मोक्षसाधनानि त्रिणि भवन्ति- भक्तिः, ज्ञानं वैराग्यमिति। एतेषां प्राप्तिः सर्वैर्नभवति। अतः सांसारिकाणां कृते भक्तिः एव मुक्तिप्रदायिनी भवति।

**भक्तेः वाङ्मयम्-**

भगवत् भक्त्यार्थं वाक् अपेक्षते। वाग्भिः पूर्णमेव वाङ्मयमित्युच्यते । बाङ्गमयमपि त्रिविधम्- प्रभुसम्मितम् , कान्तासम्मितम् मित्रसम्मितम् च।

**भक्तिकाव्यानां मूलम्-**

प्रमुखतया भक्तिकाव्यानां मूलभूत उदाहरणानि वेदेषु द्रष्टुं शक्यते। चतुर्षु वेदेषु वहबो देवताः स्तुताः। वेशेषत: अग्नि, इन्द्र,रुद्र, वरुण, विष्णु इत्येतेषां स्तुतिः वेद सुक्तेषु दृश्यते। वेदेषु बहुनां देवानां महिमा अपि वर्णिताः दृश्यते । अनन्तरं पुराणादिषु भक्तेः वर्णनं बहुधा दृश्यते । पुनश्च अनन्तरं काव्येषु वाङ्मयेषु बहुनि स्तोत्राणि दृश्यन्ते।

कालान्तरे भक्तिरसात्मककाव्यस्य स्तोत्रमिति व्यवहारः जातः।

स्तोत्रकाव्यानां लक्षणादि निरुपणात् पूर्वमस्माभिः भक्तेः निर्वचनम्, भक्तेः रसत्वम् आदि निरूपणीयम्।

**भक्तेः निर्वचनम्-**

केयम् भक्तिः ? इति प्रश्नस्य उत्तरं आचार्यैः श्लोक माध्यमेन दत्तम् । यथा-

**"द्रुतस्य भगवद्धर्मात् धारावाहिकतां गता।**
**सर्वेशे मनसो वृत्तिः भक्तिरित्यभिधीयते।।"**

- श्लोक-3 श्री भगवद्भक्तिरसायन(प्रथमोल्लासः)

**"चित्तद्रव्यं हि जतुवत् स्वभावात्कठिनात्मकम्।**
**तापकैर्विषयैर्योगे द्रवत्वं प्रतिपद्यते।।"**

- श्लोक-4 श्री भगवद्भक्तिरसायनम्(प्रथमोल्लासः)

**भक्तस्य लक्षणम्-**

**" अनन्तवैकुण्ठमुकुन्दकृष्ण गौविन्द दामोदर माधवेति।**
**वक्तुं समर्थोऽपि न वक्ति कश्चित् अहो ! जनानां व्यसनाभिमुख्यम्।।"**

पुनश्च त्वदनुग्रह विना न किश्चिन्मयान्यत्पार्श्यते इति भगवति निष्कारण भक्तिः भक्तेन करणीया भवति। एतत् अपि मुकुन्दमालायाम् यथा-

**"नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः**
**कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम् ।**
**रम्या रामा मृदुतनुलतनन्दे नापि रन्तुं**
**भावे भावे हृदयभवने भावयेयं भवन्तम् ।।**
**नास्था धर्मे न वसुनिचये नैव कामोपभोगे**
**यद्यद्भव्यं भवतु भगवन् पूर्वकर्मानुरूपम्।**
**एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि**
**त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ।।"**

(मुकुन्दमाला)Page-14

**नवधा भक्तिः-**

स्वाधीत ज्ञानस्य सारं पृच्छन्तं हिरण्यकशिपुं प्रह्लादः एवं उवाच-

**"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।**
**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।।**
**इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।**
**क्रियते अगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ।।"**

( श्रीमद्भागवतम् (Page-17)

एषः एव प्रह्लादस्य उपदेश: यैः भक्तैः अनुसृयते ते एव श्रेष्ठाः इति स्वात्मान प्रतिपादनम्। तदपि कार्पण्ययुक्तम्। अर्थात् दैन्ययुक्त-प्रार्थनापूर्वकम् उत्तमोत्तमम् इत्यर्थः । तत्र श्रुयते यत् नारदः श्रवण-परीक्षण - जप द्वारा मोक्षं प्राप्तवान्।भीष्मः स्मरणेन, कुष्ण: आदि सेवायाः,अन्ये बहवः भक्ताः अर्चनेन मोक्षं प्राप्तवन्तः इति श्रूयते ।

**स्तोत्रशब्दस्य व्युत्पत्तिः-** स्तूयते अनेन इति स्तोत्रम्। उक्तंश्च स्तवः स्तोत्रम् स्तुतिः नुतिः भूतार्थव्याहृतिः इत्यादयः पर्यायाः । स्तु धातोः स्तुतिः इत्यर्थः । स्तु धातोः स्ट्रन् इति प्रत्यययोगे 'स्तोत्रम्' इति शब्दः निष्पन्नः । अमरकोशानुसारं स्तु धातोः अप् प्रत्ययस्य योगे स्तवः इति स्तु धातोः क्तिन् प्रत्यये स्तुतिः इति पर्यायाः। यैः पद्यैः भगवन्तं स्तूयन्ते स्तोत्रमिति निष्कर्षः।

**स्तोत्रवाङ्मयस्य विकासः-**

वेदानां स्तोत्राणि प्रायः सर्वाणि श्लोकात्मकानि इति पुरा बहुधा उक्तम्। पुराणेषु अपि स्तोत्रसहस्राधिकाः सन्ति। केषाञ्चन पुराणानां स्तोत्राणि लोके बहुधा प्रसारितानि सन्ति । यथा उदाहरणार्थं महाभारतेवनपर्वणियुधिष्ठिरविरचितं सूर्यस्तोत्रम् अस्ति तथा शिवसहस्त्रनामस्तोत्रम् अनुशासनपर्वणि दृश्यते, पुनश्च अनुशासन-पर्वस्य पञ्चत्रिंशत्तमोऽध्यायेभगवतः विष्णोः सहस्रनामानां सार्वत्रिकं-स्तोत्रं दृश्यते ।

तथैव रामायणस्य युद्धकाण्डे आदित्यहृदयस्तोत्रस्य वर्णनं वर्तते, यत् सर्वेषां रोगाणां चिकित्सा इति मन्यते।

श्रीमद्भागवते तु अनेकानि स्तोत्राणि सन्ति, केवलं दशमस्कन्धे एव पञ्चाशत् अधिकानिकृष्णस्तोत्राणि वर्तन्ते।

प्रथमस्कन्धे अष्टमाध्याये भीष्मकृतस्तुतिः रमणीया वर्तते। एषा एकादशात्मिका स्तुतिः प्रसिद्धा एव।

एकमुदाहरणार्थं-

**ललितगतिविलासवल्गुहास– प्रणयनिरीक्षणकल्पितोरुमानाः।**
**कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगन् किल यस्यगोपवध्वः ॥**

-श्रीमद्भगवतम् - प्रथमस्कन्धः(9.40)

सप्तमेस्कन्धे नवमऽध्याये प्रह्लादकृत – नरसिंहस्तुतिः अपि अत्यन्त प्रसिद्धा वर्तते। उदाहरणार्थं-

**"एकस्त्वमेव जगदेतममुष्य यत्त्वम्**
**आद्यन्तयोः पृथगवस्यसि मध्यतश्च।**
**सृष्ट्वा गुणव्यतिकर निजमायभेदं**
**नानेव तैरवसितस्तदनुप्रविष्टः ॥"**

- श्रीमद्भागवतम्, सप्तमस्कन्धः - 9.30

एवं सहस्राधिकानि स्तोत्राणि पुराणेषु प्राप्यन्ते । हरिहरस्य स्तुतिषु काव्ये बहूनि स्तोत्राणि सन्ति। यथा रघुवंशमहाकाव्यस्य दशमश्लोके देवकृता विष्णुस्तुतिः सुप्रसिद्धा। यथा –

रावणपीडिताः देवाः नारायणमाश्रित्य विंशतिश्लोकैः स्तुतवन्तः। तस्मिन् दत्ताः श्लोकाः काव्यात् पृथक्त्वेऽपि अद्यापि स्वतन्त्रस्तोत्रत्वेन स्वीक्रियन्ते । उदाहरणार्थं -

**सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः ।**
**सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्॥**

- रघुवंशम् - १०.२०

**स्तोत्रभेदाः–**

**"स्तुतिः स्तोत्रं प्रशंसा च स्तवो गीतिर्नमस्कृतिः।"**

अर्थात्, स्तोत्रं नाम देवतायाः गुणगानम्, यत् भक्त्या कृतं वर्तते। भारतीयसंस्कृतेः हृदयं भक्तिरेव। भक्ति व्यक्तीकरणाय साधनानि अनेकानि सन्ति, तेषु स्तोत्रपाठः प्रमुखः। ऋषयः, कवयः, भक्तजनाश्च परमेश्वरस्य स्तुतिं कृत्वा आत्मानं पवित्रं कृतवन्तः। भगवद्भक्तेः प्रसादेन रचितानि एतानि स्तोत्राणि न केवलं काव्यरूपेण रम्याणि, किन्तु साधकस्य मनःशुद्ध्यै, चित्तशान्त्यै, मोक्षाय च प्रयोजकानि

भवन्ति। भगवतः गुणकीर्तनपराणि, चरित्रवर्णनपराणि च। "गानविशिष्टं मन्त्रोच्चारणं स्तोत्रमप्रगीतमन्त्रसाध्यगुणिनिष्ट गुणाभिधानं गानरहितं एक स्तुति रूपोच्चारणं शास्त्रम्" इति स्तोत्रशास्त्रोयोः भेदः विशिष्टाद्वैतकोशे लभ्यते। पुनश्च मत्स्यपुराणानुसारं स्तोत्राणि चतुर्धा विभज्यन्ते। तानि च द्रव्यस्तोत्रं, कर्मस्तोत्रं, विधिस्तोत्रम्, अभिजनस्तोत्रमिति। एतेषां चतुर्विधस्तोत्राणां क्रमशः स्वरूपं वर्ण्यते।

**१.द्रव्यस्तोत्रम्-** यत्र यज्ञाद्यनुष्ठानेषु तथा च भगवदाराधनेषु उपयुज्यमानानां द्रव्याणां प्रशंसनम् दृश्यते।

**२.कर्मस्तोत्रणि-** यत्र वेदविहितकर्मणामाराधनादि अनुष्ठानं च क्रियते।

**३.विधिस्तोत्रम्-** यत्र एवं कर्तव्यं एतत्कर्तव्यमित्याद्युपदेशात्मक स्तोत्राणि दृश्यन्ते।

**४. अभिजनस्तोत्रम्-** अभिजनः नाम कुलमथवा वंशः इति।यत्र वशिष्ठ विश्वामित्रादिराज वंशानां वर्णनं दृश्यते, ते अभिजनस्तोत्रणि भवन्ति।

**स्तुतिस्तवस्य कृते अनुकूलः समयः –**

मनुष्यस्य जीवनं श्रद्धया, भक्त्या च पूरितं भवेत्।भगवतः स्तुतिः, स्तवः, जपः, ध्यानं वा केवलं कर्मरूपं न, किन्तु आत्मभावस्य अभिव्यक्तिः।अष्टप्रहराकात्मके दिने भगवान् कदा स्तोतव्यः इति प्रश्नः तु आयात्येव। शैशव-बाल्यादि-वयोवस्थासु सुप्त-जाग्रदादि दैनिकावस्थासु कदा वा भगवत् स्तोत्रस्य अवकाशो भवेदिति प्रश्नः अपि आगच्छति।भगवतः स्मरणं सर्वकाले शुभं, तथापि शास्त्रेषु केचन*विशेषसमयाः*स्तुत्यर्थं अधिकानुकूलाः निर्दिष्टाः तथाएष प्रश्नः केवलं अस्माकं मनसि नायाति अपितु श्रीमद्भागवते परीक्षितेनापि उत्त्थापितवान् –

**"निद्रयाहीयते नक्तं यमायेन नमं वयः।**

**दिवाचार्येहया राजन् कुटुंब भरणेन च ।।"**

- (श्रीमद्भागवतम्द्वादश स्कन्धः, तृतीयोऽध्यायः, श्लोक 4)

एवं वदन् श्रीशुकः स्वजीवनकाले अपि भगवतः स्मरणस्य अवसरं अन्वेष्टुं आवश्यकता व्यक्त्या प्रकाशिता।।

**बालस्तावत् क्रीडासक्तः तरुणस्तावत् तरुणीसक्तः ।**

**वृद्धस्तावत् चिन्तास्तः परमे ब्रह्मणि कोपि न शक्तः ।।**

- श्लोक संख्या: 22 भजगोविन्दं (मोहमुद्गर स्तोत्र)

एषः प्रसिद्धः*भजगोविन्दम्*स्तोत्रस्य एकः श्लोकः अस्ति, यत्र श्री**आदि शंकराचार्यः** मानवानां जीवनचक्रं सुन्दररूपेण दर्शयति, देहिनां कार्यान्तरसक्तमेव सर्वास्ववस्थासुनिरूपितवन्तः। अतः विषयवासनाः दूरीकृत्य योग्येवयसि स्थितः नरःसर्वासु अवस्थासु भगवद्भजनं, ब्रह्मचिन्तनं च कर्तुम् उचितम्।

**संसारे स्तोत्राणामुपयोगिता—**

संसारमध्ये स्तोत्राणाम् उपयोगिता अत्यन्तं महत्त्वपूर्णा अस्ति। स्तोत्राणि मनुष्यस्य चित्तं शुद्धयन्ति, दुःखं निवारयन्ति, श्रद्धां भक्तिं च वर्धयन्ति।एतेषां पाठेन मनः स्थिरं भवति, आत्मज्ञानं प्रबुद्धं च जायते।स्तोत्रपठनं धर्ममार्गप्रवर्तकं, पापकषायकं, पुण्यप्रदं च अस्ति। अतः स्तोत्राणां संसारजीवने उपयोगिता अमूल्या, आध्यात्मिकशान्तिप्रदा च अस्ति। स्तोत्रं मनसः शुद्धिं, भक्तेः वृद्धिं, देवतास्मरणं च जनयति।स्तोत्रपाठेन मनोविकाराः निवर्तन्ते, चित्तं प्रसन्नं भवति।एतेन आत्मविश्वासः, श्रद्धा, समता च वर्धते।स्तोत्राणि वेदान्तसारं वहन्ति, तस्मात् तेषां अध्ययनं ज्ञानवृद्धिकरं भवति।नित्यं स्तोत्रपठनं पापक्षयाय, पुण्यवृद्धये, आयुरारोग्यविजयप्राप्तये च साधनं भवति।

**संक्षेपेण —**

संस्कृतस्तोत्राणि संसारदुःखनिवारकाणि,चित्तशुद्धिकराणि,मोक्षमार्गदर्शकानि च भवन्ति।

**परिशिलितग्रन्थसुची**


1. संस्कृत साहित्य का इतिहास – वलदेव उपाध्याय।
2. श्रीजगन्नाथ स्तोत्र रत्नावली – संकलकः – डा. सुरेन्द्रकुमारमिश्रः - 2007
3. शारदापीठ प्रदीप , द्वारिका संस्कृत अकादमी – 2017
4. श्रीजगन्नाथ स्तोत्र रत्नाकर – संकलकः –श्री चिन्तानणिदाशः 2016
5. संस्कृत निवन्ध शतकम् – सांविदि प्रकाशन, पुरी, ओडिशा - 2014
6. श्रीजगन्नाथाष्टकम् – डा. सोमनाथ दाशः , पुरी, ओडिशा - 2025
7. श्रीजगन्नाथ संस्कृतिः – रा.सं.विश्वविद्यालयः, तिरुपति – 2025
8. जगन्नाथ संस्कृतौ समाजवादः – निउ भारतीय वुक् कर्पोरेसन्, निउ दिल्ली - 2003